# bilvAShtaka

# બિલ્વાષ્ટક

## Document Information

Text title : bilvAShTakam.h

File name : bilvaashhtaka.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : Subramanian Ganesh (sg at tulblr.unisys.com)

Proofread by : Shree

Latest update : January 21, 1998

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# bilvAShtaka

# બિલ્વાષ્ટક

ત્રિદલં ત્રિગુણાકારં ત્રિનેત્રં ચ ત્રિયાયુધમ્ ।
ત્રિજન્મપાપસંહારં એકબિલ્વં શિવાર્પણમ્ ॥ ૧॥

ત્રિશાખૈઃ બિલ્વપત્રૈશ્ચ હ્યચ્છિદ્રૈઃ કોમલૈઃ શુભૈઃ ।
શિવપૂજાં કરિષ્યામિ હ્યેકબિલ્વં શિવાર્પણમ્ ॥ ૨॥

અખણ્ડ બિલ્વ પત્રેણ પૂજિતે નન્દિકેશ્વરે ।
શુદ્ધ્યન્તિ સર્વપાપેભ્યો હ્યેકબિલ્વં શિવાર્પણમ્ ॥ ૩॥

શાલિગ્રામ શિલામેકાં વિપ્રાણાં જાતુ ચાર્પયેત્ ।
સોમયજ્ઞ મહાપુણ્યં એકબિલ્વં શિવાર્પણમ્ ॥ ૪॥

દન્તિકોટિ સહસ્રાણિ વાજપેય શતાનિ ચ ।
કોટિકન્યા મહાદાનં એકબિલ્વં શિવાર્પણમ્ ॥ ૫॥

લક્ષ્મ્યાસ્તનુત ઉત્પન્નં મહાદેવસ્ય ચ પ્રિયમ્ ।
બિલ્વવૃક્ષં પ્રયચ્છામિ હ્યેકબિલ્વં શિવાર્પણમ્ ॥ ૬॥

દર્શનં બિલ્વવૃક્ષસ્ય સ્પર્શનં પાપનાશનમ્ ।
અઘોરપાપસંહારં એકબિલ્વં શિવાર્પણમ્ ॥ ૭॥

કાશીક્ષેત્રનિવાસં ચ કાલભૈરવદર્શનમ્ ।
પ્રયાગમાધવં દૃષ્ટ્વા હ્યેકબિલ્વં શિવાર્પણમ્ ॥

મૂલતો બ્રહ્મરૂપાય મધ્યતો વિષ્ણુરૂપિણે ।
અગ્રતઃ શિવરૂપાય હ્યેકબિલ્વં શિવાર્પણમ્ ॥ ૮॥

બિલ્વાષ્ટકમિદં પુણ્યં યઃ પઠેત્ શિવસન્નિધૌ ।
સર્વપાપ વિનિર્મુક્તઃ શિવલોકમવાપ્નુયાત્ ॥

॥ ઇતિ બિલ્વાષ્ટકમ્ ॥

*bilvAShtaka*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*